पूर्वमध्यमा द्वितीय खण्ड (कक्षा–10वीं) 2025–26

विषय कोड–1020

विषय– आयुर्विज्ञानम्

समयः घण्टा त्रयम् पूर्णांकाः100

उत्तरमाला (A)

1. उचित विकल्पं चिनुत– 1x6=6

(i) ब. षट् (ii) ब. 300 (iii) स. आत्मा (iv) द. जलस्य (v) स. षट् (vi)षोडशं।

2. रिक्त स्थानं आपूर्तिः प्रका यत– (i) मन्त्रवत (ii) धातवः (iii) अस्थिः (iv) कला (v) मर्म (vi) शब्दः 1x6=6

~~(i) भवन्ति (ii) भवन्ति (iii) भवति (iv) भवति (v) करोति (vi) करोति~~

3. उचितमेलनं कुरू– 1x6=6

(i) चलसन्धि–अचल सन्धि (ii) संयुक्त प्रतर (iii) सप्त भवन्ति (iv) चत्वारि (v) स्पर्शज्ञानम् (vi) त्वचा

4. सत्यम्/असत्यम् कथनं निर्धारयत– 1x7=7

~~(i) सत्य, (ii) सत्य (iii) सत्य (iv) असत्य (v) सत्य (vi) सत्य (vii) सत्य~~

(i) सत्यं (ii) असत्यम् (iii) असत्यं (iv) सत्यम् (v) सत्यम् (vi) असत्यम्

5. एक वाक्येन उत्तर लिखत– 1x7=7

(i) कफस्य कार्याणि पंचधा विभक्तानिं।

(ii) तामस प्रकृतिः गुरूः आवरकः नियामकः च अस्ति।

(iii) अग्नि प्रधानः भावः पित्तम्।

(iv) कोष्ठः पुनरूच्चते महास्रोतः शरीरं मध्यं महानिमग्नं।

(v) कफं कारणात् मन्दाग्निः।

(vi) अवस्थापाकः पाचन प्रक्रिया त्रिसृषुभवन्ति–मधुर–अम्ल–कटुः।

(vii) अवस्था प्रकाराः त्रयः सन्ति।

6. केषांचित् पंच प्रश्नानां अतिलघूत्तरीयमुत्तरं देयम्– (20 शब्दः) 5x4=20

(i) चरकमते–स्वस्थस्य स्वास्थ्य लक्षणं आतुरस्य विकाशशमनं शरीरज्ञान प्रयोजनं।

(ii) षडांग शरीरे विभागाः सन्ति।

(iii) चिकित्सकः स्नायून जानाति स मानवशरीरस्य शल्यं समर्थोभवति ग्रहणादगताना।

(iv) बहुचेष्टा संन्धिः उदुखल सन्धिः वर्तते।

(v) त्वचः कार्याणि षट्। स्पर्शज्ञानं महत्वपूर्णम्।

(vi) वात–पित्त–कफाः एते त्रिदोषाः कथ्यन्ते।

(vii) सत्व रजतम चेति त्रयोप्रोक्ता महागुणाः। पदार्थस्य संघटनं गुणः भवति। :।

7. केषांचित त्रय प्रश्नानां लघूत्तरीयमुत्तरं देयम्– (40 शब्दः) 3x6=18

(i) भारतदे ो 12 तः 14 वर्षायुि ा रजोद नि भवतिं यएक्तमेव स्त्रीणां मासे–मासे गर्भकोष्ठ मनु प्राप्यत्रयह प्रवर्तमान मार्तव माहुः

(ii) कोरसन्धिः कति प्रकाराः सन्ति। (1) खल्लकोरः (2) परस्परकोरः (3) चक्रकोरः (4) संदेश कोरः

(iii) मर्माणां संख्या 107 (सप्तोत्तरमेक शतम्) वर्तते।

"सप्तोत्तर मर्म शतं शरीरे भवन्ति तानि पंचात्मकान्ति।
मांससिरास्नायु तथास्थि नान्यानि मर्माणि भवन्ति देहे।।

(iv) पित्ते अर्थ पचनं अथवा परिणमन। सर्वेषु कार्येषु पचनं भूत्वा बाह्यपदार्थनां परिणमनम् भवति। पित्र कार्यम्।

(v) समतुल्यस्य आहारस्य अत्यंत महत्वम्–

पंचभूतात्मके देहे हि आहारः पांचभौतिकः।
विपक्वः पंचधा सम्यग गुणान् स्वानभिवर्द्धयेत्।।

(vi) परमाणु भेदान् अग्नेः त्रि प्रकाराः सन्ति–

(1) कोष्ठाग्निः (2) राधात्वग्निः (3) पांच भौतिकाग्निः

8. केषांचित् चतुः प्रश्नानां दीर्घोत्तरीयमुत्तरं देयम्– (80 शब्दः) 4x5=20

(i)पुरूष ाब्दस्य व्युत्पत्तिः

चक्रपाणिमतानुसारम्

"पुरि शरीरे शेते व्युत्पत्या य आत्मा पुरूषशब्देन–
उच्यते तमाह चेतनेत्यादि।" (च.शा.1/16)

'पुर अग्रगमने' धातोः पुरूषशब्दः सज्जायते। यस्यार्थो गमनमिति। अर्थात् देहदेहान्तरे लोकलोकान्तरे सूक्ष्मपुरूषस्य गमनं भवति, अतः एव पुरूषः कथ्यते। अग्रगमनत्वाद् ज्ञायते यत् जड़ीभूतं जगत् पुरूषसंयोगेनैव विद्यमानं वर्तते।

(ii)कूर्चाः

कुर्चाः षड् भवन्ति। ते हस्तयोः पादयोः ग्रीवायंमेढ्रे च भवन्ति। तस्य संख्या अत्र निर्दिश्यते।

संख्या

| | |
|---|---|
| हस्तयोः– | 2 |
| पादयोः– | 2 |
| ग्रीवायाः– | 1 |
| मेढ्रे– | 1 |
| | 06 |

पेशीस्नायुसिराधमन्या च सन्निपातः कूर्चमिव दृश्यते।"

(iii) वातादयः शरीरे प्रकृतावस्थायां नैकाः क्रियाः संपादयन्ति यथा।
वातः– इदं शरीरस्य मूलकं तथा प्राणदायकं द्रव्यमस्ति।
पित्तम्– एतत् शरीरस्य उ माजनकद्रव्यं वर्तते।
कफः– (श्लेष्मा)–शरीरे ओजस्विता बलज्ज प्रददाति।

दोषसंख्या

दोषाणां संख्याविषये आचार्यैः वातपित्तकफः इति त्रयः दोषरूपेण परिगण्यन्ते।

(iv)पित्तदोषस्य प्रकाराः–

पाचकं भ्राजकं चैव रंचकालोचक्रे तथा।
साधकश्रेति पंचैव पितानामान्यनुक्रमात।।

(शा.पू.5/32)

रसभेदेन पित्तस्य पंच प्रकाराः भवन्ति यथा–पाचकपितम्, भ्राजकपितम्, रंजकपित्तम्, आलोचकपित्तम्, साधकपित्तम् च।

(v)आहारपरिणाम्करा: भावाः

आहारं परिणामपर्यन्तं प्रापयितुं आहार से परिवर्तनकारकाणां भावानां वर्णन विविधैः आचार्यैः कृतं।

आहारपरिणामकरास्त्विये भावा भवन्ति।

तद्यथा–उष्मा, वायुः, क्लेदः, स्नेहः, कालः, समयोगश्चेति।

(च.शा. 6/14)

(1) उष्मा (2) वायुः (3) क्लेदः (4) स्नेहः (5) कालः (6) समयोगः।

अत्र उष्मा अग्निप्रधानभावः विद्यते एवज्ज अन्ये वायुः, क्लेदः, स्नेहः, कालः, समयोगादयः, सहकारिणः भावाः, प्रोक्ता।

(vi)जठराग्निः(पाचकाग्नि)

शरीरान्तर्गताः (13) त्रयोदशाग्नयः सन्ति। तत्र जठराग्नेः प्राधान्यमस्ति।
अहं वैश्वानरो भूत्वा प्राणिनां देहमाश्रितः। प्राणापानसमायुक्तं पचाम्यन्नं चतुर्विधम्।। (भ.गी.) अ 15/14

अशितखादितपीतलीढ्रादयः आहाराः। एषु चतुर्षु प्रकारेषु अन्नस्वरूपेषु विविध–प्रकारकानाम् आहारविकृतीणां समावेशः भवति। भुक्तपदार्थाः प्राणिनां यत् हितकारी तत् जठराग्निना प्रवृद्धा, ते स्वस्य उष्णतया सम्यग् पाचयति। पाचकाग्निचतुर्विधानाम् आहाराणां विविधरीत्या पाचनं करोति। यदन्नं शरीरधातूनां ओजसः च पोषणं करोति तथा बलं वर्णं प्रददाति, तत्सर्व कर्म अग्नेः हेतुभूता भवति।

पाचकाग्नेः मुख्यकर्म तु अन्नपाचनम्।

9. वि लेषणात्मक प्रश्नाः समाधेया–(120 शब्दः) 2x5=10

1—परिणामानुसार गर्भ पोषण वर्गीकरण कुरूत।

गर्भपोषणम्—

यथामातुस्तु खलु रसवहायां नाडयां गर्भनाभिनाडीप्रतिबद्धा, साऽस्य मातुराहारवीर्यरसमभिवहति। तेनोपस्नेहेनास्य अभिवृद्धिर्भवति। (सुशा.3/31)

मातुः रसवाहिनीनाडी गर्भस्य नाभिनाडया सह संयुक्ता भवति। नाभिनाडीयं मातुराहाररसवीर्याणि गर्भ प्रति प्रेरयति तेन उपस्नेहेन गर्भस्याभिवृद्धिः भवति। गर्भाधानसमयात् अपरिणतांगप्रत्यभंगप्रविभागयुक्तस्य गर्भस्य सर्व ारीररावयवानुसारी रसवहतिर्यग्गामी धमनी इत्यस्य उपस्नेहः एव जीवनं प्रददाति।

गर्भस्य खलु रसनिमित्तारूताध्माननिमित्तां च परिवृद्धिर्भवति।।

"तस्यान्तरेण नाभेस्तु ज्योतिः स्थान ध्रुवं स्मृतम्।

तदाधमति वातस्तु देहस्तेनास्य वर्धते।। (सु.शा.4/58)

वास्तविकत्वेन गर्भस्य परिवृद्धिः मातुः आहारस्य रसकारणात् वायु—आध्यमानकारणात् भवति। श्लोके उक्तं गर्भस्य नाभ्वन्तरेण उदारगुहायाम् अग्निस्थानं नि चयेन भवति। वायुः अग्निं प्रध्मापनेन प्रदीपयति येन शरीरं परिवर्धितं भवति। तस्मात् ज्योतिस्थानात् उत्पन्नः वायुः गर्भस्य मांसलपिण्डस्य प्रध्मापनेन यथा परितः स्रोतसां विदारणं करोति तथा गर्भस्य वृद्धि भवति।

अथवा

अस्थिः परिचयः—

मानवशरीराधाराभूतानि अस्थीनि सन्ति। शरीरस्य सर्वांगप्रत्यवायवयवषड्धातूनामाधारः अस्थीनि एव सन्ति। मानवस्य गमनावगमनादिक्रिया व्यवसिततास्थिषु सत्सु संभविताः सन्ति। एतेषामस्थिनामुपरि पेशी वर्तते पेश्यावृत्तानि अस्थीनि सन्ति।

सुश्रुतमतानुसासरम् अस्थिःवर्णनम्

"आभ्यन्तरगतैः सारैर्यथा तिष्ठन्ति भूरूहाः।
अस्थिसारैस्तथा देहा श्रियन्ते देहिनां ध्रुवम्।।"

यथा वृक्षाः स्वाकीयान्तः सारभागेनावृत्ताः सन्ति तथैव जीवधारिणः देहिनोऽपि अस्थिसाराधारिताः वर्तन्ते। शरीरस्य सर्वोत्तमं कठिनधातुस्थि वर्तते। मेदात् अस्थिनः समुत्पतिर्भवति। गर्भेऽस्मिन् पितृजभावात् अस्थीनि सज्जायन्ते। पांचभौतिकानि अस्थीनि वर्तन्ते तथापि वायुदोषाश्रितानि सन्ति। तस्मात् वायोरधिष्ठानं मन्यतें सर्वधातूनां स्वकीयः धात्वाग्निः भवति। अस्थग्निः रसात् सारं एवं किटटं विभाजनं करोति। सारभागात् अस्थिधातोः मलस्वरूपेण नखाः रोमणि च समुद्रभवन्ति।

2—आहारविधिविशेषायतनानि अष्ट सन्ति

1. प्रकृतिः (Natural qualities of food stuff)

"तत्र प्रकृति रूच्यते स्वभावो यः" (च.वि.1/21–1) अर्थात् द्रव्येषु यः स्वभावः भवति सा 'प्रकृतिः' कथ्यते।

2. करणम् (Preparation of food)
   "क्रियते यत् करणम्" द्रव्याणां स्वाभाविकगुणतः भिन्नगुणानाम् उत्पत्तिः एव 'करणम्'।
3. संयोगः (Combination of food)
   द्वयोः पदार्थयोः परस्परं संमेलनम् एव 'संयोगः' कथ्यते।
4. राशिः (Quantity of food studd)
   पदार्थानां मात्रा वा परिमाणः 'राशिः' नाम्ना ज्ञायते।
5. देशः (Habit)
   "देशः पुनः स्थानम्' द्रवयाणाम् उत्पत्तिः एवं तेषां स्थानदर्शकः देशः कथ्यते।
6. कालः (Time)
   आहारोत्पतिग्रहणयोः नियतसमयः 'कालः' इति नाम्रा ज्ञायते।
7. उपयोग–संस्थाः (Rules of use)
   भोजनस्य ग्रहणस्य नियमाः एव 'उपयोगसंस्थाः'।
8. उपयोक्ता (User) उपयोकत्–

   आहारस्य भोक्ता, भोज़नग्राहकः एव 'उपयोक्ता'

अथवा

यकृतः कार्य विश्लेषणीयम्?

यकृतः कार्यम्– यकृत् शरीरस्य सर्वश्रेष्ठः कार्यकर्ता अवयवोऽस्ति। तस्य कार्याणि इत्थं वर्तन्ते।

1. "एमिनोएसिड्स" इत्यस्य त्रोटनान्तरम् अनावश्यकं "नाइट्रोजन" दूरीकृत्य तस्य युरिया निरूपयति यस्य मूत्रद्वाराः बहिः निष्कासनं भवति।
2. शरीस्य रक्तप्रवाहगतत्रुटिकोषाणां "न्यूकिलओप्रोटिन" इत्यस्य विघटनं कृत्वा ततः "यूरिकएसिड्" निरूपयति यस्य मूत्रद्वारा उत्सर्जनं भवति।
3. अग्न्याशयस्य अन्तःस्रावः "इन्स्युलीन" इत्यस्योपस्थितौ "ग्लुकोझ" इत्यस्य "ग्लायकोजन" इत्यस्मिन् परिवर्तनं करोति तथा अन्तः स्रावः "ग्लुकोगान"

   इत्यस्योत्पस्थितौ "ग्लायकोजन" इत्यस्य ग्लुकोझय इत्यस्मिन् परिणमनं करोति।